http://www.sgbauonline.com/

**AV–856**

**M.A. (Part-I) Sanskrit (Semester-I) Examination**

**SANSKRIT**

**Paper—3**

**(Indian Philosophy)**

समय:—होरात्रयम्] [पूर्णाङ्क:—80

**सूचना :**— निर्देशाभावे प्रश्ना: स्वीकृत भाषयैव समाधेया:।

1. (अ) वाक्यद्वयस्य विवरणं कुरुत : 10

(i) शीतस्पर्शवत्य: आप:।

(ii) तद्वति तत्प्रकारकोऽनुभवो यथार्थ:।

(iii) असाधारणं कारणं करणम्।

(iv) अभावप्रत्यक्षे विशेषणविशेष्यभाव: सनिकर्षो।

(ब) टिप्पणौ लिखत : 6

(i) अभाव:।

(ii) वायु:।

(iii) मन:।

(iv) असमवायिकारणम्।

2. (अ) वाक्यद्वयस्य विवरणं कुरुत : 10

(i) तद्विविधं निर्विकल्पकं सविकल्पकं चेति।

(ii) अनुमितिकरणमनुमानम्।

(iii) लिङ्गं त्रिविधम्। अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति।

(iv) आकाङ्क्षा योग्यता संनिधिश्च वाक्यर्थज्ञानहेतु:।

(ब) टिप्पणौ लिखत : 6

(i) प्रतिज्ञा।

(ii) आश्रयासिद्ध:।

(iii) उपमिति:।

(iv) प्रागभाव:।

3. (अ) कारिकयो: स्पष्टीकरणं देयम् : 10

(i) दृष्टमनुमानमाहावचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धि: प्रमाणाद्धि।।

(ii) त्रिगुणमविवेकि विषय: सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं, तद्विपरीतस्तथा च पुमान्।।



http://www.sgbauonline.com/

(iii) पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।

पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।

(iv) स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम्।

पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्।।

(ब) टिप्पणी लिखत : 6

(i) सत्कार्यवादः

(ii) मूलप्रकृतिः

(iii) पुरुषः

(iv) दुःखत्रयम्।

4. (अ) कारिकायोः स्पष्टीकरणं देयम् : 10

(i) एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।

कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छति।।

(ii) धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण।

ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः।।

(iii) ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।

दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः।।

(iv) प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति।

या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य।।

(ब) टिप्पणी लिखत : 6

(i) द्विविधः प्रवर्तते सर्गः।

(ii) ज्ञानेन चापवर्गः।

(iii) कैवल्यम्।

(iv) प्रधानम्।

5. योग्य उत्तरं विचिनुत (केऽपि षोडश) : 16

(1) 'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं' किमस्ति ?

(अ) प्रत्यक्षम् (ब) अनुमानम्

(क) उपमानम् (ड) परामर्शः

(2) समवायः कतिविधः ?

(अ) द्विविधम् (ब) एकविधम्

(क) त्रिविधम् (ड) चतुर्विधम्



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(3) तर्कसंग्रहस्य रचयिता कः ?

(अ) ईश्वरकृष्णः (ब) महामुनि गौतमः

(क) सदानन्दः (ड) वरदराजः

(4) संदिग्धसाध्यवान् ______ ।

(अ) सपक्षः (ब) पक्षः

(क) विपक्षः (ड) पक्षधर्मः

(5) हेत्वाभासाः कतिविधाः ?

(अ) चत्वारः (ब) एकः

(क) पञ्च (ड) षट्

(6) तत्र निष्प्रकारकं ज्ञानं ______ ।

(अ) सविकल्पकम् (ब) निर्विकल्पकम्

(क) सप्रकारकम् (ड) अनुमानम्

(7) ज्ञानाधिकरणम् ______ ।

(अ) परमात्मा (ब) आत्मा

(क) ईश्वरः (ड) मनः

(8) परमपरं चेति द्विविधं ______ ।

(अ) सामान्यम् (ब) समवायः

(क) पदार्थाः (ड) अभावाः

(9) नित्यसंबन्धः ______ ।

(अ) समवायः (ब) सामान्यम्

(क) अभावः (ड) विशेषः

(10) अर्थाबाधो ______ ।

(अ) योग्यता (ब) आकाङ्क्षा

(क) सानधि (ड) हेत्वाभासः

(11) वैशेषिकसूत्रप्रणेता कः ?

(अ) गौतमः (ब) सदानन्दः

(क) कणादः (ड) ईश्वरकृष्णः

(12) सांख्यदर्शने कतिप्रमाणानि स्वीकृतानि ?

(अ) त्रीणि (ब) चत्वारिः

(क) पञ्च (ड) षट

(13) सांख्यदर्शनस्य प्रवर्तकः कः ?

(अ) ईश्वरकृष्णः (ब) सदानन्दः

(क) कपिलमुनिः (ड) पतञ्जलि



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(14) सांख्यदर्शने किं नाम अव्यक्तम् ?

(अ) प्रकृतिः (ब) पुरुषः

(क) महत् (ड) अहंकारः

(15) विकृत्यः कानि सन्ति ?

(अ) 16 (ब) 10

(क) 8 (ड) 11

(16) अंतःकरणं कतिविधं भवति ?

(अ) चतुर्विधम् (ब) त्रिविधम्

(क) द्विविधम् (ड) एकम्

(17) पुरुषः कः अस्ति ?

(अ) द्रष्टा (ब) अव्यक्तः

(क) प्रकृतिः (ड) ईश्वरः

(18) बन्धः कस्मात् भवति ?

(अ) विपर्ययात् (ब) प्रधानात्

(क) महतात् (ड) संशयात्

(19) सांख्यमते दुःखं कतिविधम् ?

(अ) त्रिविधम् (ब) द्विविधम्

(क) एकम् (ड) चतुर्विधम्

(20) सांख्यमते अनुमानं कति विधम् ?

(अ) द्विविधम् (ब) चतुर्विधम्

(क) त्रिविधम् (ड) षड्विधम्



http://www.sgbauonline.com/